पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकादशनक्षत्रम्। तत्तु खट्वाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति मुहूर्त्तचिन्तामणिः ॥ अपि च।

"दक्षिणोत्तरगते दितारके
योनिभे मिलति मस्तकोपरि।
कौटतः स्फुटसरोरुहानने!
निःसृता २६८ गजरसाक्षिलिप्तिकाः॥"

इ० ४।२८। इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥ तत्र जातफलम्।

"शूरस्त्यागी साहसी भूमिभर्त्ता
कोपाक्रान्तः स्वाच्छरालोऽतिदक्षः।
धूर्त्तः क्रूरोऽत्यन्तवाताधिकः प्राक्-
फल्गुन्यब्जेऽजकाले च यस्य॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) बृहस्पतिः। इति शब्दमाला ॥

पूर्व्वभद्रपदः, पुं, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदा २।
पूर्व्वभद्रपदा, स्त्री,
पूर्व्वभाद्रपदाः, स्त्री,

इत्यमरः ॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदास्तु। प्रोष्ठो गौः भद्रश्च गौः तस्येव पाद आसां तास्तथा। ग्रहपतिरिव भद्रपादानुगतो राजेत्याचार्य्यमञ्जरी शेषाद्भद्रपदाशब्दो इत्यादिः भाद्रपदाशब्दो दीर्घादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति मुकुटादयः ॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे समुदायस्त्वासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दो द्वित्वे बहुत्वे च भद्रपदा इत्यपीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः ॥ * ॥ तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिका। भाराकृतिताराद्वयरूपा वा। तदधिदेवता अजपादः आसां जघन्यगुणः। इति ज्योतिषम् ॥ अपि च।

"भारमूर्त्तिरतिकोपरिस्थिते
पूर्व्वभाद्रपदभे दितारके।
लिप्तिकाः करिकराक्षि २२८ संमिता
निःसरन्ति वृषभोदयात् प्रिये!॥"

इ० ३।४८। इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य नित्यम्।
भवेन्महीयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वयक्षः, पुं, (पूर्व्वश्चासौ यक्षश्चेति। पूर्व्वे पूर्व्वस्मिन् काले यक्षो वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ जम्भलः ३ जलेन्द्रः ४। इति त्रिकाण्डशेषः ॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रञ्ज+अधिकरणे घञ्।) नाट्योपक्रमः। इति हेमचन्द्रः। २।१६६ ॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुणनिका ३। इति जटाधरः ॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६।२०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वः पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दशाविशेषः। यथा,—

"श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम् ॥

पूर्व्वरात्रः, पुं, (रात्रेः पूर्व्वो भागः। अच् समासे। "रात्राह्नाहाः पुंसि।" २।४।२९। इति पुंस्त्वम्।) रात्रेः पूर्व्वभागः। इति मुग्धबोधव्याकरणम् ॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"——————प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। श्रमो रतिर्विवर्णत्वमिति। तथा बालगुरुवाक्यप्रद्वेषादि। सामान्याभिप्रायेणैव तन्त्रान्तरे यथा। व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति। तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। उरःक्षतादौ लिङ्गान्येव वातादिजान्यव्यक्तानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनमिति॥

हारीतेऽप्युक्तम्। इति पूर्व्वरूपमन्येषां ज्वराणां सामान्यतो विशेषात्तु जृम्भाङ्गमर्द्दभूयिष्ठं हृदयोद्वेगि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः। येन श्रमादिना उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवेपथ्वादिना अनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् न त्वावरणादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसमीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादम्परित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रामणाज्ज्ञेयो हीनवादी स वै नरः॥"

इति मिताक्षरा ॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्त्यस्येति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राड्न्यायकारणोक्तौ तु प्रत्यर्थी निर्द्दिशेत् क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा ॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः ॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।"३।२।१९। इति टः।) अग्रगामी। यथा, भट्टिः। ५।६७।

"द्विषन् वनेचराग्र्याणां त्वमादाय चरो वने।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि यण् (अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम् ॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माघोनी ४ ऐन्द्री ५ माघवती ६। तद्दिग्भववायुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः।
गुरुर्व्विदाहशमनो वातदः पित्तनाशनः॥"

इति राजनिर्घण्टः ॥

अपि च। राजवल्लभः।

"प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यपस्त्रोपधीषु च॥
भग्नोत्पिष्टक्षतादीषु रागश्वयथुदाहकृत्।
सन्निपातज्वराश्वासत्वग्दोषार्शोविषक्रिमीन्॥
कोपयेदामवातञ्च घनसंघातकारणम्॥"॥*॥

तद्दिगधिपतयः मेषसिंहधनूराशयः। यथा,—

"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात्॥"

इति ज्योतिस्तत्त्वम् ॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः।२।३।१३३॥ (यथा, रघुः।१।६७।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिनमूर्द्धा २। इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे। १।१८।

"पिङ्गोत्तुङ्गजटाजूटगतो यस्यानुते नवः।
सन्ध्यापिशङ्गपूर्व्वाद्रिशृङ्गसङ्गस्तथं शशी॥")